# শ্রীকমলাকবচম্

{॥ শ্রীকমলাকবচম্ ॥}

শ্রীগণেশায় নমঃ ।

ওঁ অস্যাশ্চতুরক্ষরাবিষ্ণুবনিতায়াঃ

কবচস্য শ্রীভগবান্ শিব ঋষীঃ ।

অনুষ্টুপ্ছন্দঃ । বাগ্ভবা দেবতা ।

বাগ্ভবং বীজম্ । লজ্জা শক্তিঃ ।

রমা কীলকম্ । কামবীজাত্মকং কবচম্ ।

মম সুকবিত্বপাণ্ডিত্যসমৃদ্ধিসিদ্ধয়ে পাঠে বিনিয়োগঃ ।

ঐঙ্কারো মস্তকে পাতু বাগ্ভবাং সর্বসিদ্ধিদা ।

হ্রীং পাতু চক্ষুষোর্মধ্যে চক্ষুর্যুগ্মে চ শাঙ্করী ॥ ১॥

জিহ্বায়াং মুখবৃত্তে চ কর্ণয়োর্দন্তয়োর্নসি ।

ওষ্ঠাধারে দন্তপঙ্ক্তৌ তালুমূলে হনৌ পুনঃ ॥ ২॥

পাতু মাং বিষ্ণুবনিতা লক্ষ্মীঃ শ্রীবর্ণরূপিণী ॥

কর্ণযুগ্মে ভুজদ্বন্দ্বে স্তনদ্বন্দ্বে চ পার্বতী ॥ ৩॥

হৃদয়ে মণিবন্ধে চ গ্রীবায়াং পার্শ্বয়োর্দ্বয়োঃ ।

পৃষ্ঠদেশে তথা গুহ্যে বামে চ দক্ষিণে তথা ॥ ৪॥

উপস্থে চ নিতম্বে চ নাভৌ জংঘাদ্বয়ে পুনঃ ।
জানুচক্রে পদদ্বন্দ্বে ঘুটিকেঽঙ্গুলিমূলকে ॥ ৫॥

স্বধা তু প্রাণশক্ত্যাং বা সীমন্যাং মস্তকে তথা ।
সর্বাঙ্গে পাতু কামেশী মহাদেবী সমুন্নতিঃ ॥ ৬॥

পুষ্টিঃ পাতু মহামাযা উৎকৃষ্টিঃ সর্বদাঽবতু ।
ঋদ্ধিঃ পাতু সদা দেবী সর্বত্র শম্ভুবল্লভা ॥ ৭॥

বাগ্ভবা সর্বদা পাতু পাতু মাং হরগেহিনী ।
রমা পাতু মহাদেবী পাতু মাযা স্বরাট্ স্বযম্ ॥ ৮॥

সর্বাঙ্গে পাতু মাং লক্ষ্মীর্বিষ্ণুমাযা সুরেশ্বরী ।
বিজযা পাতু ভবনে জযা পাতু সদা মম ॥ ৯॥

শিবদূতী সদা পাতু সুন্দরী পাতু সর্বদা ।
ভৈরবী পাতু সর্বত্র ভেরুণ্ডা সর্বদাঽবতু ॥ ১০॥

ত্বরিতা পাতু মাং নিত্যমুগ্রতারা সদাঽবতু ।
পাতু মাং কালিকা নিত্যং কালরাত্রিঃ সদাঽবতু ॥ ১১॥

নবদুর্গাঃ সদা পাতু কামাখ্যা সর্বদাঽবতু ।

যোগিন্যঃ সর্বদা পাতু মুদ্রাঃ পাতু সদা মম ॥ ১২॥

মাত্রাঃ পাতু সদা দেব্যশ্চক্রস্থা যোগিনী গণাঃ ।

সর্বত্র সর্বকার্যেষু সর্বকর্মসু সর্বদা ॥ ১৩॥

পাতু মাং দেবদেবী চ লক্ষ্মীঃ সর্বসমৃদ্ধিদা ॥

॥ ইতি বিশ্বসারতন্ত্রে শ্রীকমলাকবচং সম্পূর্ণম্ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org


Kamala Kavacham Lyrics in Bengali PDF
% File name : shriikamalaakavach.itx
% Category : kavacha
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : vishvasAratantra
% Latest update : August 18, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website